# A-I/1/1298/22

## प्रथमसत्रार्द्धम्

## प्रथमपत्रम्

## जैनदर्शनम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:।** **(15×2=30)**

1. प्रमेयकमलमार्त्तण्डस्य कोऽर्थ: ?

2. प्रमाणशब्द: कर्तृकरणभावसाधन: कथं प्रोक्त: ?

3. प्रमाणमीमांसा दार्शनिकेषु कथं महत्त्वं बिभर्ति ?

4. प्रमाणकमलमार्त्तण्डो नाम टीकाग्रन्थ: कस्योपरि वर्तते ?

5. प्रमाणाभासात् किं भवति किं वा न भवति ? स्पष्टयत।

6. कारकसाकल्यं विवेचयत।

7. साधकतमत्वं कुत्र भवति ग्रन्थदिशा स्पष्टयत।

8. इन्द्रियवृत्ति: प्रमाणम् इति के मन्वते ?

9. समारोपविरुद्धत्वात् इति हेतो: किं साधितं ग्रन्थकृता ?

10. शब्दाद्वैतवादिन: के सन्ति ?

11. सम्यग्ज्ञानप्रमाणम् इत्यत्र ज्ञानस्य सम्यग् विशेषणं कथं नियोज्यते ?

**अथवा**

अपूर्वार्थस्य लक्षणं प्रतिपादयत।

12. अदुष्टकारणारब्धं प्रमाणम् इत्यस्य कोऽर्थ: ?

**अथवा**

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्" इत्यनेन किमुच्यते ?

13. ज्ञातृव्यापार: प्रमाणम् इति मतं केषां वर्तते ?

**अथवा**

ज्ञातृव्यापार: कारकैर्जन्य: अजन्यो वा ? इत्यस्य कोऽर्थ: ?

14. "सम्बन्धाभिधेयरहितस्योन्मत्तादिवाक्यवत्" इत्यस्य कोऽर्थः ?

**अथवा**

कुतो हि कारकसाकल्यादिकं साधकतमव्यपदेशार्हं न भवति ?

15. ज्ञानस्य व्यवसायात्मकत्वमिति विशेषणेन किं प्रतिफलति ?

**अथवा**

विपरीतख्यातिः कुत्र ज्ञाने भवति कुतश्च तज्ज्ञानमप्रमाणम् ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. "मूलग्रन्थे मङ्गलविधानं विहितं ग्रन्थकृता" इति टीकाकारवचोभिः समर्थ्यताम्।

17. कारकसाकल्यस्य प्रमाणत्वाभावे को हेतुः प्रमुखायते ? तस्य भावः प्रकटीक्रियताम्।

18. प्रमाणलक्षणं स्वसंस्कृतगिरा विशदयत।

**अथवा**

"अनिर्दिष्टफलं सर्वं न प्रेक्षापूर्वकारिभिः।
शास्त्रमाद्रियते तेन वाच्यमग्रे प्रयोजनम्॥" –इति स्वसंस्कृतगिरा विशद्यताम्।

19. "भेदाभेदयोः परस्परपरिहारेणावस्थानादन्यतरस्यैव वास्तवत्वादुभयात्मकत्वमयुक्तम्" –इति पूर्वपक्षस्य निराकरणं कुरुत।

**अथवा**

अपूर्वार्थः कः कथञ्च विशेषणमिदं स्वीकृतं ज्ञानस्येति ? स्पष्टयत।

20. विपर्ययज्ञानानां शास्त्रदिशा समीक्षा विधेया।

**अथवा**

प्रमाकरणं प्रमाणमिति सर्वेषां मतं तथापि तत्र विवादः कथम् ? स्पष्टयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. प्रमेयकमलमार्त्तण्डस्य दर्शनशास्त्रीयं योगदानम्।

**अथवा**

जैनप्रमाणमीमांसायाः वैशिष्ट्यम्।

**अथवा**

शब्दाद्वैतवादस्य निरसनम्।

# A-I/2/1299/22

## प्रथमसत्रार्द्धम्

## द्वितीयपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. तत्त्वार्थवार्तिककारस्य कालं लिखत।

2. वार्तिकेन किं तात्पर्यम्?

**अथवा**

सूत्रस्य लक्षणं लिखत।

3. "चिकित्सा विशेषप्रतिपत्तिवत" वार्तिकस्य भावं लिखत।

**अथवा**

"आत्यन्तिकः सर्वकर्मनिक्षेपो मोक्षः" वार्तिकस्य भावं लिखत।

4. मोक्षमार्गस्य लक्षणं लिखत।

5. नयस्य स्वरूपं लिखत।

6. समवायस्य स्वरूपं किम् अस्ति?

**अथवा**

समवायस्य भेदानां नामानि लिखत।

7. सम्यग्दर्शनस्य स्वरूपं लिखत।

**अथवा**

तत्त्वानां नामानि लिखत।

8. सम्यक् शब्दस्य किं तात्पर्यम्? स्पष्टयत।

9. 'निसर्ग' इत्यस्य कोऽर्थः?

10. निर्जरायाः लक्षणं लिखत।

11. "अतद्भावं वा" इत्यस्य किं तात्पर्यम्?

12. मतिज्ञानस्य स्वरूपं लिखत।

**अथवा**

प्रमाणस्य किं लक्षणम्?

13. "तत्प्रमाणे" सूत्रस्य भावं स्पष्टयत।

14. भवप्रत्ययावधिज्ञानस्य लक्षणं लिखत।

15. केवलज्ञानस्य स्वरूपं लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. मोक्षमार्गोपरि निर्वचनं ग्रन्थानुसारेण प्रस्तुत।

17. "श्रेयोमार्गप्रतिपित्सात्मद्रव्यप्रसिद्धेः" इति वार्तिकं विशदयत।

**अथवा**

"तन्निसर्गादधिगमाद् वा" सूत्रस्य भावं लिखत।

18. सम्यग्दर्शनस्य लक्षणं लिखत।

19. निक्षेपस्य स्वरूपं भेदं च लिखत।

**अथवा**

नयस्य भेदानां स्वरूपं लिखत।

20. मतिज्ञानस्य स्वरूपं भेदं च स्पष्टयत।

**अथवा**

श्रुतज्ञानस्य लक्षणं भेदं च स्पष्टयत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. जैनदर्शने ज्ञानस्य स्वरूपं भेद-प्रभेदं च विशदयत।

**अथवा**

ग्रन्थस्य प्रथमाध्यायस्य विषयवस्तूपरि निबन्धं लिखत।

# A-I/3/1300/22

## प्रथमसत्रार्द्धम्

## तृतीयपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. अस्तिकायस्य किं स्वरूपम्?
2. पुद्गलस्य कति भेदाः सन्ति?
3. मूर्तिकद्रव्याणि कानि?
4. का अनुकम्पा?
5. कः मोक्षः?
6. सुरलोकं कः प्राप्नोति?
7. सप्तभङ्गानां नामानि लिखत।
8. कर्म कतिविधम्?
9. स्थावरजीवानां कतिभेदाः सन्ति? नामानि लिखत।
10. द्रव्येषु गुणेषु च सर्वथा भिन्नत्वं अस्ति न वा?
11. स्कन्धस्य कति भेदाः सन्ति? नामानि लिखत।

**अथवा**

आकाशस्य किं स्वरूपम्?

12. द्वीन्द्रियजीवाः के सन्ति?

**अथवा**

'सत्ता सव्वपयत्था' इत्यस्य अर्थं लिखत।

13. ज्ञानोपयोगस्य कति भेदाः सन्ति?

**अथवा**

स्थितिहेतुत्वं किम्?

14. कालः अस्तिकायः अनस्तिकायः वा?

**अथवा**

जीवानां भेदद्वयं लिखत।

15. अजीवस्य किं स्वरूपम्?

**अथवा**

ग्रन्थदिशा पापं किम्?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. पाठ्यग्रन्थस्य मङ्गलाचरणं विलिख्य व्याख्यां कुरुत।

17. ग्रन्थानुसारेण मोक्षमार्गस्य स्वरूपं प्रतिपादयत।

18. दव्वं सल्लक्खणियं उप्पादव्वयधुवत्तसंजुत्तं।
गुणपज्जयासयं वा जं तं भण्णंति सव्वण्हू॥ अस्याः गाथायाः अर्थं लिखत।

**अथवा**

ज्ञानोपयोगस्य स्वरूपं भेदांश्च वर्णयत।

19. सव्वेसिं खंधाणं जो अंतो तं वियाण परमाणू।
सो सस्सदो असद्दो एक्को अविभागी मुत्तिभवो॥ –इमां गाथां विवेचयत।

**अथवा**

पुद्गलविषये एका टिप्पणी कार्या।

20. जीवास्तिकायस्य स्वरूपं वर्णयत।

**अथवा**

नवपदार्थाः संक्षेपेण प्रतिपादनीयाः।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. पञ्चास्तिकायग्रन्थस्य प्रतिपाद्यविषयं विवेचयत।

**अथवा**

पञ्चास्तिकायग्रन्थकारस्य परिचयं लिखत।

# A-I/4/1301/22

## प्रथमसत्रार्द्धम्

## चतुर्थपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. महामहोपाध्याययशोविजयस्य कालं निर्दिशत।
2. तर्कभाषेति नामकरणं ग्रन्थकृता सूचितं, कथं हि तन्नाम जैनतर्कभाषा स्वीक्रियते?
3. पाठ्यग्रन्थदिशा प्रमाणलक्षणं लिखत।
4. अवग्रहो द्विविधः कथमुच्यते? नाम्ना निर्दिशत।
5. प्रत्यक्षं द्विविधं भवति तन्नाम प्रज्ञापयत।
6. केवलज्ञानस्य किमस्ति स्वरूपम्?
7. स्मृतेः प्रामाण्यं कथं स्यात्?
8. व्याप्तिज्ञानं कस्य प्रमाणस्य लक्षणमुक्तं ?
9. प्रत्यभिज्ञानस्य भेदाः पाठ्यग्रन्थदिशा निर्दिश्यन्ताम्।
10. अनुमानं कीदृशं ज्ञानं?
11. हेतोर्लक्षणं जैनपरम्परानुगुणं लिखत।

**अथवा**

न तु त्रिलक्षणकादिः हेतोर्लक्षणमिति वचनं स्पष्टयत।

12. नैगमनयस्य लक्षणं लिखत।

**अथवा**

द्रव्यार्थिकनयस्य प्रयोजनं पाठ्यग्रन्थदिशा सूचयत।

13. को नयः द्रव्यार्थिकाभासः प्रोच्यते?

**अथवा**

संग्रहनयलक्षणं लिखत।

14. निक्षेपाः के भवन्ति ? भेदाः निर्दिश्यन्ताम्।

**अथवा**

"भावं चिय सङ्कणया सेसा इच्छन्ति सव्वणिक्खेवे" इत्यस्य कोऽर्थः ?

15. नामनिक्षेपस्य परिभाषणं सोदाहरणं क्रियताम्।

**अथवा**

द्रव्यार्थिकनये कति निक्षेपाः नियोज्यन्ते ? के च ते ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. हेत्वाभासस्य निरूपणं विधीयताम्।

17. अविरुद्धानुपलब्धिर्नामा हेतुः सप्तविधः प्रोक्तः, निर्दिश्यताम्।

18. मनःपर्यवज्ञानस्य सभेदं निरूपणं ग्रन्थदिशा क्रियताम्।

**अथवा**

सांव्यवहारिकप्रत्यक्षं ग्रन्थदिशा समालोचयत ?

19. परोक्षप्रमाणं विविच्य स्मृतेः प्रमाणतां उपपादयत ?

**अथवा**

प्रत्यभिज्ञानस्य निरूपणं यथाग्रन्थं समुपस्थापयत ?

20. जीवविषये चत्वारो निक्षेपाः नियोजनीयाः।

**अथवा**

"नामाइतियं दव्वट्ठियस्स भावो अ पज्जवणयस्स।

संगहववहारा पढमगस्स सेसा उ इयरस्स॥" –इति गाथा सुविशदतया व्याख्येया।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. आचार्ययशोविजयगणिवर्यस्य कृतित्वद्योतनम्।

**अथवा**

तर्कभाषानुगुणं परोक्षप्रमाणस्य प्रस्तुतिः।

**अथवा**

हेतोः सभेदं स्वरूपनिदर्शनम्।